**Kaumodaki : Journal of Multidisciplinary Studies**
[ A Peer-Reviewed, Open Access Journal; Indexed in NepJOL ]
ISSN : 2822 - 1567 (Print); ISSN : 2822 -1583 (Online)
Published by Research Committee, Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

# गण्डकीगौरवकाव्ये शास्त्रप्रभावः

**जगन्नाथरेग्मी**
Department of Sahitya (Sanskrit Literature), Vinduwasini Sanskrit Vidyapeeth (Campus), Pokhara, Nepal

***Article History*** **:** *Submitted 02 Aug. 2021; Reviewed 10 Sept. 2021; Revised 15 Oct. 2021*
***Corresponding Author*** **:** *Jagannath Regmi,* ***Email*** **:** *jagan.regmi8@gmail.com*
***DOI*** **:** *https://doi.org/10.3126/kdk.v2i1.43120*

**सारः**

*श्रीकृष्णगण्डकी भगवती भागीरथीव पुराणप्रथिता लोकवन्दिता प्राकृतिकसुषमया सम्पूरिता हिमगिरिप्रसूता नदी । सरित्प्रवरा, चक्रनदी, गण्डिका, गण्डकी इत्यादीनि अस्या नामानि । इमां सरित्प्रवरामधिकृत्य पन्थीत्युपाह्वेन उमानाथेन गण्डकीगौरवं काव्यं विरचितम् । अस्मिन् अध्ययने पूर्वोक्तकाव्ये शास्त्रप्रभावः कीदृश इति विवेचितो वर्तते । भाषासौष्ठवदृष्ट्या,वस्तुवर्णनदृष्ट्या,शास्त्रान्तरविषयप्रतिपादनदृष्ट्या च काव्यमिदं प्रभावकारि विद्यते । काव्येऽस्मिन् गण्डकीविषये यत् किमपि वर्णितं तत् पौराणिकीः कथाः समुपजीव्य प्रस्तुतम् । विविधेषु शास्त्रेषु पुराणेषु च स्थितानि गण्डकीसम्बद्धान्युपाख्यानानि संक्षिप्य श्लोकेनैकेन सङ्केतितानि । आवश्यके स्थले तेषां प्रमाणवचान्यपि टिप्पण्यां प्रदर्शितानि । गण्डक्या महत्त्वं जानन्तोऽपि नैपालककवयः गण्डकीं विहाय गङ्गाया वर्णनेनात्मानं कृतार्थयन्तो दृश्यन्ते स्म । गण्डक्या महिमप्रकाशकस्य काव्यस्याभाव आसीत् । उमानाथकविना गण्डकीगौरवं काव्यं प्रणीय तस्याभावस्य पूर्तिर्विहिता, समाजो बहूपकृतः,नैपालकसंस्कृतकाव्यपरम्परा च सबलीकृतेति गण्डकीगौरवस्य शास्त्रीयं साहित्यिकञ्च महत्त्वं वर्तत इति अस्याध्ययनस्य सारः ।*

***शब्दकुञ्जी :*** *उपाख्यानम्, काव्यम्, गण्डकी, पुराणम्, शास्त्रम्*

## विषयप्रवेशः

पौरस्त्यवाङ्मयस्य स्कन्द-पद्म-वाराह-ब्रह्मवैवर्त-देवीभागवत-श्रीमद्भागवतादिपौराणिकग्रन्थेषु कृष्णगण्डक्यास्तद्-गर्भे विद्यमानानां भगवत्स्वरूपाणां शालग्रामाणाञ्च वर्णनं प्राप्यते । कृष्णाभा, कृष्णगण्डकी, गण्डकी,गल्लिका, गण्डिका, चक्रनदी, देवनदी, सरित्प्रवरा इत्यादीनि गण्डक्या नामान्तराणि । इयं नदी नेपालस्थमुस्ताङजनपदस्योत्तरे विद्यमानयोर्मुक्तिक्षेत्रदामोदरकुण्डयोः प्रादुर्भूय म्याग्दी, पर्वत, बागलुङ, स्यङ्जा, गुल्मी, पाल्पा, तनहुँ, नवलपरासी इत्येतेषां जनपदानां नैकान् भूभागान् सिञ्चन्ती हरिहरक्षेत्रे पटनायां गङ्गया सह मिलति । नेपाले प्रवहन्तीनां शुक्ला, वृद्धा ,त्रिशूली, मोदी, दरौंदी, मादी, इत्येतासां सप्तगण्डक्यन्तर्गता-नाम् अन्यासां नदीनामपेक्षया अस्याः पृथक् वैशिष्ट्यमस्ति । गण्डकीसमुत्पत्तिभूमेर्मुक्तिक्षेत्रादारभ्य त्रिवेणीपर्यन्तं नैकानि घट्टानि तीर्थस्थलानि च सन्ति । अस्यास्तीरेषु पुलस्त्य

*copyright 2022 © the Author(s) and the Publisher*

-पुलह-भरत -जैमिनि -देवदत्त- व्यास- वाल्मीकिप्रभृतीनामृषीणां राजर्षीणां साधनाक्षेत्राणि विद्यन्ते । गण्डकीप्रस्रवणक्षेत्रं हरिहरक्षेत्रेणापि प्रसिद्धम् । विश्वस्मिन् विश्वे सुप्रथिताया गण्डक्याः सांस्कृतिकं पौराणिकम् आध्यात्मिकञ्च विषयमादाय गुल्मीमण्डले वि. सं. १९६४ तमे वर्षे जातेन उमानाथनाम्ना कविना गण्डकीगौरवमित्यभिधेयं काव्यं प्रणीतम्। विक्रमाब्दस्य २००० तमे वर्षे प्रणीतमेतत् काव्यं २००७ तमे वर्षे प्रकाशितमुपलभ्यते । केवलम् एकसप्ततिपद्यैर्विलसित-मप्येतत् काव्यं कवित्वदृष्ट्या शास्त्रव्युत्पत्तिदृष्ट्या च महनीयमस्तीति प्रकृतकाव्ये शास्त्रान्तरप्रभावो विविच्यते ।

## समस्याकथनम्

गण्डकीगौरवकाव्ये शास्त्रप्रभावः कीदृशः ?

## उद्देश्यकथनम्

गण्डकीगौरवकाव्ये शास्त्रप्रभावस्यान्वेषणम् ।

## पूर्वकार्यस्य समीक्षा

उमानाथस्य गुरुणा कुलचन्द्रगौतमेन गण्डकीगौरवमधिकृत्य भूमिकायां (वि. सं. २०००) पद्यात्मकं संक्षिप्तं समीक्षणं विहितमस्ति । काव्यमिदं कवेरुमानाथस्य विलक्षणप्रतिभाप्रसूतं सत्सूक्तिभरितं सुन्दरं काव्यमस्तीति तदीयो निष्कर्षः।

शिवराजाऽचार्यः कौण्डिन्यायन इत्यनेन कतिपयनैपालक-संस्कृत-ग्रन्थकार-परिचयः (वि. सं. २०४८) इति ग्रन्थे गण्डकीगौरवकाव्यं कुलचन्द्रगौतमकृत-गङ्गागौरवकाव्यस्यानुकारि लघुस्तवकाव्यमस्तीत्युल्लिख्य केवलं काव्यस्यास्य सामान्यः परिचयः प्रस्तुतोऽस्ति ।

'गण्डकीगौरवस्य साहित्यिकी विशेषता' (गण्डकीगौरवको साहित्यिक विशेषता) वि. सं.२०५४ इति शीर्षके वेणीमाधवढकाल-दुर्गादत्तशर्मोपाध्याय-मोतीलालशर्मरिजाल इत्येतैः सम्पादकैर्भाषाप्रयोगः,काव्यतत्त्वम्, शास्त्रतत्त्वम् इत्याद्युपशीर्षकेषु गण्डकीगौरवस्य लघ्वी चर्चा कृतास्ति । नित्यनुष्ठानवत् प्रतिदिनं गण्डकीतीरे सहस्रं गायत्रीमन्त्रं जप्त्वा प्रणीतमिदं काव्यं भक्तिरसकेन्द्रितं हृदयसंवेद्यं काव्यं वर्तते । ज्यौतिष-धर्मशास्त्र-योगशास्त्र-न्याय-वेदान्तप्रभृतीनां शास्त्रान्तराणां प्रमाणानि पुरस्कृत्य कविना काव्यतत्त्वशास्त्रतत्त्वयोः समन्वयः कृतोऽस्तीति चर्चयद्भिः सम्पादकैः काव्यस्यास्य गुणवत्ता प्रतिपादितास्ति ।

टीकारामपन्थी इत्यनेन काव्यचतुष्टयविमर्शः (वि. सं. २०६३ ) इति पुस्तके कवेरुमानाथपन्थिनस्तत्काव्यस्य गण्डकीगौरवस्य च विस्तृतमध्ययनं कृतमस्ति । तत्र विषयवस्तु, छन्दोविधानम्, अलङ्कारप्रयोगः, रससंयोजनम्, प्राचीनवाङ्मयचित्रितचरित्रचित्रणम्,कृत्यन्तरप्रभावः, समाजचित्रणम् इत्याद्युपशीर्षकेषु विहिते तदध्ययने गण्डकीगौरवस्य साङ्गोपाङ्गविश्लेषणे प्रयत्नो विहितो वर्तते । तथा सत्यपि प्रभावनिरूपणे सङ्केत एव कृतः परं शास्त्रान्तर-निरूपणत्वशिष्टमेव ।

वेणीमाधवढकालेन ऋतम्भरा (वर्ष ४, अङ्क ७) ( २०५७ ) पत्रिकायां 'नेपालदेशीयम् आधुनिकसंस्कृत-साहित्यम्' इति शीर्षकलेखस्य अन्यकाव्यप्रणयनमित्युपशीर्षके नेपाले संस्कृतकविभिः प्रणीतानां काव्यखण्ड-काव्यस्फुटकाव्यानां गणनाक्रमे गण्डकीगौरवकाव्यस्य गणनां कृत्वा काव्यस्यास्यान्वेषणीयत्वं सूचितमस्ति ।

घटराजभट्टराई इत्यनेन 'संस्कृतका अमर साहित्यकार' (संस्कृतस्य अमरसाहित्यकारः) वि.सं. २०५५ इति ग्रन्थे नेपालभारतयोः प्रसिद्धिमाप्तानां संस्कृतकवीनां चर्चां विधाय 'नेपालका संस्कृत कविहरू र ग्रन्थ विवरण' (नैपालक-संस्कृत- कवयस्तेषां ग्रन्थविवरणम्) इत्युपशीर्षके संस्कृत -साहित्ये प्रसिद्धानां कवीनां काव्यानाञ्च गणनायाः सन्दर्भे कवेरुमानाथस्य तत्प्रणीतस्य गण्डकीगौरवकाव्यस्य च उल्लेखो विहितो वर्तते ।

गण्डकीगौरवमधिकृत्य नाधिकमध्ययनं जातम् । कतिपयैरन्वेषकैर्नैपालकसंस्कृतकाव्यस्य इतिहासस्यान्वे-षणक्रमे, कतिपयैर्लेखकैः कवेरुमानाथस्य परिचयप्रदानसन्दर्भे गण्डकीगौरवकाव्यस्य चर्चा विहिता विद्यते । कृते ष्वध्ययनेषु काव्यचतुष्टयविमर्श नाम्नि पुस्तके टीकारामपन्थिना कृतमध्ययनं विश्लेषणात्मकमस्ति । तत्रापि शास्त्रप्रभावस्य सामान्यः सङ्केतः कृतः । इतोऽतिरिक्तान्यध्ययनानि न दृश्यन्ते । अतो विधीयमानमध्ययनमौ-

चित्यपूर्णमिति कर्मण्यस्मिन् अध्येतुः प्रयत्नः ।

## अध्ययनविधिः

गण्डकीगौरवमिति काव्ये शास्त्रान्तरप्रभावपरिशीलने केन्द्रितेऽस्मिन् अध्ययने सामग्रीणां सङ्कलने पुस्तकालयविधिरवलम्बितो वर्तते । गण्डकीगौरवकाव्यमस्य प्राथमिकं स्रोतः । विषयसम्बद्धाः पौराणिकग्रन्थाः द्वितीयस्रोतांसि । अत्र निगमनात्मकविधिमनुसृत्य मुख्यविषयस्याध्ययनं विहितमस्ति चेत् सन्दर्भविषयाणां गृहीतानां सामग्रीणाञ्च व्यवस्थापने एपिए पद्धतिरनुसृता वर्तते ।

## कथावस्तु

भगवत्याः श्रीकृष्णगण्डक्याः पावनं वृत्तं गण्डकीगौरवम् इति काव्यस्य कथावस्तु विद्यते । नाम्नैव ज्ञायते अत्र श्रीकृष्णगण्डक्या बहुविधो महिमा वर्णितोऽस्ति । कृष्णायास्तटे गुल्मीजनपदे लब्धजन्मा उमानाथकविः पुराणेषु प्रथितायाः कृष्णाया महत्त्वप्रकाशनाय काव्यमिदं प्रणीतवान् इति विदितं भवति । नमस्कारात्मकमङ्गलाचरणेन काव्यं प्रारभ्यते । इयं नदी संसारतापतप्तानां प्राणिनां रक्षायै विष्णोर्गण्डस्थलाद् नेपालभूमाववतीर्णास्ति । गण्डक्या उद्गमभूमिर्मुक्तिक्षेत्रत्वेन भुवि प्रथितास्ति । बहुजन्मार्जितेन भाग्येन अत्र जनिः प्राप्यते । अत्र लब्धजन्मानः प्राणिनो मुक्ता भवन्तीति कविर्विश्वसिति । गण्डक्या जलम् अमृतादपि मधुरमस्ति । गण्डक्यां सर्वे देवाः शालग्रामरूपेण निवसन्ति । अखिलभुवनानां घटकः सर्वेश्वरो हरिरपि गण्डकीनन्दनो भूत्वा अत्रैव राजते । बुधा याथातथ्येन गण्डक्या रहस्यं ज्ञातुं नैव पारयन्ति । गण्डक्या दर्शनेन मनुजानां पापानि विनश्यन्ति । अत्र कृतावगाहानां जनानां मनोरथाः सिद्ध्यन्ति । अस्यास्तीरे मृताः प्राणिनः परमं पदमाप्नुवन्ति ।

विषयाऽऽमयपीडितं मनः गण्डकीकृपया श्रीहरिपदपङ्कजे स्थिरं भवतीति विचिन्तयन् कविः सबहुमानं गण्डकीं स्तौति :-

विषयासक्तेन मया ध्यानजपार्चनैः श्रीहरिर्न परितोषितः, दुर्लभं मानुषं जन्म व्यर्थैव नीतम्, गण्डकीं विना मम नान्या गतिः । यथा मम जन्म निष्फलं न स्यात् तथा कृपां कुरु । ऋषिभिः प्रवर्तितं मुक्तिदं मार्गं विहाय मया कुपन्थावलम्बितः इति महान् खेदोऽस्ति, परमहं तवैव पुत्रः । पुत्रः खलः स्यात् उत कृतघ्नोऽपि किं न स्यात् माता स्वसुतं नोपेक्षते । चिरसञ्चित-वासना मां सांसारिकविषयेषु धक्कयति । संसारसागरे पतितं मां समुद्धर । भवतापनिवृत्तये तव तीरं शीतलं शिवदं पवित्रं चास्तीति मुनयो वदन्ति । सर्वेश्वरो विष्णुरपि तव गर्भे शालग्रामरूपेण राजत इति मुनिभिर्बहुधा प्रशंसितः । त्वदीयो जलकल्लोलरवः प्राणिनां पापतर्जने समर्थोऽस्ति । त्वज्जलपानेन जडता ह्रियते, तत्र मज्जतां जनानां भवचक्रभ्रमिरपि शाम्यति । यद्यपि हिमालयान्निःसृताः सरितः सहस्रशः सन्ति, तथापि हरिः स्वयं तव गर्भे वसतीति तव प्रणयाधिक्यैव कारणं मन्ये । बहुपुण्यवशात् तवान्तिके जन्म प्राप्यते । तव पवित्रे जले कृतावगाहो जनो यदि धनमानलिप्सया पुनः सांसारिकप्रपञ्चे निपतति चेत् स भाग्यहीनः खलु । पुरा गण्डकीतीरे तपस्तप्त्वा षोडशसहस्रं कन्या भगवतो रामाद् वरं लब्ध्वा कृतार्था अभूवन् । विषयेषु निःस्पृहा विमत्सरा जना सततं त्वां समाश्रयन्ते ते धन्याः । भवदुःखभञ्जने ते करुणां विना नान्या गतिः । तव नीरेण तर्पिताः सद्गतिं गताः पितरोऽपि तृप्तिं यान्ति, ते पुत्रेभ्यो धनधान्यसुखं प्रयच्छन्ति । स्वयं नरकान्तको विष्णुस्तव जले सदा तिष्ठतीति त्वां समाश्रयतां नरकात् का भीतिः ? तव तीरे गायत्र्युपासनारतानां जनानां पुण्यं को नु वर्णयेत् । विन्दुमात्रकमपि शालग्रामजलं पिबतां जनानामघता नश्यते चेत् प्रतिदिनं तव तीरसेविनामनघता स्वतःसिद्धास्ति । संसारसंतरणे बहूनि साधनानि शास्त्रेषु वर्णितानि । तानि कलिकाले विलुप्तानि, परं त्वदीये देवत्वं कदापि न नश्यतीति तव महिमा किं वर्णये ? संयोगादपि तव जले प्राणिनामस्थि निपतितं चेत् शालग्रामरूपेण परिणमत इति महदाश्चर्यम् । गृध्रदम्पती त्वत्करुणया जन्मान्तरे राज्यसुखमनुभूय वैकुण्ठं प्रापतुरिति सत्यमेव । राजर्षिर्भरतोऽपि राज्यसुखं विहाय गण्डकीतीरे तपस्तप्त्वा त्रिजन्मान्ते ब्रह्मपदं गतः । भगवान् बलरामोऽपि गण्डकीजलस्नानेन सूतहत्याजन्यपापतो मुक्तो जातः । भगवान् श्रीरामचन्द्रोऽपि अश्वमेधयज्ञस्यान्ते गण्डक्यां सस्नौ । ऋषिः पुलहोऽपि तव तीरे तपस्यन् मुक्तिं लेभे । देवदत्तो मुनिरपि तव कृपया तपःसिद्धिमवाप्तवान् । त्वदीयजलामृतसेवया पूतदेहा रुरुकन्या दुर्लभं विष्णुपदमवाप । शिल्पशास्त्र-निपुणैरपि रचयितुमशक्या चक्राङ्कितशिलाः स्वतः प्रादुर्भवन्तीति विज्ञाय नास्तिका जना मौनमाकलयन्ति । एवंविधमहि-मभरिते गण्डकीतीरे **ब्रह्म सत्यं जगन्मिथ्या** इति ज्ञानेन प्रेरितःसन् कदा त्वत्तीरे पर्णकुटिरं निर्माय श्रीविष्णोश्चरणसेवायाऽवसरं लप्स्ये ? शीतले

गण्डकीगह्वरे बद्धपद्मासनः सन् प्राणान् निरुद्धय समाधिस्थिति-माप्नुयाम् । कदा च शाम्भवीं मुद्रामाश्रित्य आज्ञानतिमिर-नाशकं भास्वरं निर्मलं ज्योतिर्लप्स्ये ? पुत्रमित्रकलत्रा-दीनां मोहजालेन बद्धं मामकीनं मनः दयया कदा पुनासि ? विषयभोगदूषिता मदीया बुद्धिः सच्चिदानन्दब्रह्मणि कदा लीयते ? परिणामे दुःखदायकं स्वर्गं न कामये । जन्ममरणादिदुःखतो मां मोचय । तव कृपया मनोगतान् कामक्रोधलोभमोहमदमात्सर्यादीन् रिपून् जेतुं शक्नुयाम् । यथा बालकस्य अस्फुटा वाणी मात्रे रुचिकरा जायते तथैव विरसापि मत्कृता स्तुतिर्गण्डक्यै रुचिरा भवेदिति कामयमानः कविः पर्यन्ते इमां स्तुतिं गण्डक्यै समर्प्य फलश्रुतिं च प्रकटयन् काव्यं समापयति ।

**श्रीमद्भागवतमहापुराणम्**

वामनरूपधारिणा भगवता विष्णुना बलिसमक्षं त्रिपदमिता भूमिर्याचिता । बलिनिग्रहावसरे भगवता च्छलेन स्वचरणं विस्तारितम् । चरणैकेन क्षितितलं मापितम्, द्वितीयेन चरणेन नभ आच्छादितम् । तत् चरणं सत्यलोकं यावद् विस्तृतम् । तत्र गतैर्मरिचिप्रभृतिभी ऋषिभिर्ब्रह्मादिभिर्देवैः सनन्दनाद्यैर्योगिभिर्वेदोपवेदैश्च भगवच्चरणं स्तुतम् । ब्रह्मणा कमण्डलुजलेन भगवतस्त्रिविक्रमस्य चरणं सबहुमानं सम्पूजितम् । चरणस्पर्शेन पवित्रितं तदेव जलं गङ्गारूपेण परिणतम् (श्रीमद्भागवतमहापुराणे ८/५/७) । विष्णोश्चरणतलात् समुद्भूता सैव गङ्गा राज्ञा भगीरथेन धरायामवतारितेति भागवतमहापुराणप्रसिद्धायाः कथायाः प्रभावो **त्वदीयतटसम्भवा** इति चतुःपञ्चाशत्तमे पद्ये **हरिपादग**मिति पदे विलोकयितुं शक्यते ।

चक्रनदी श्रीकृष्णगण्डक्या नामान्तरम् । अस्यां नद्यां गण्डकीनन्दनो भगवान् नारायणश्चक्र-शिलारूपेण विराजते । तेनैव कारणेनेयं चक्रनदी नाम्ना प्रसिद्धा । यत्राश्रमपदान्युभयतोनाभिभि-र्दृषच्चक्रैश्चक्रनदी नाम सरित्प्रवरा सर्वतः पवित्रीकरोति (श्रीमद्भागवतमहापुराणे ५/७/१०) । ऋषभदेवपुत्रो महाभागवतो भरतो वर्षायुतसहस्रपर्यन्तं राज्यं भुक्त्वा पितृपैतामहं सम्पत्तिं तनयेभ्यो विभज्य चक्रनदीं निकषा विद्यमानं पुलहाश्रमं जगाम । स परमपावनस्य पुलहाश्रमस्य एकान्तोपवने नानाविधकुसुमैः कन्दमूलफलोपहारैश्च भगवन्तमाराधयामास । सर्वात्मभावेन भगवति वासुदेवे समर्पितो नित्यानुष्ठानपरायणो भरत ऐणेयं कृत्तिं दधानस्त्रिकालस्नानेन कालं यापयामास । एकदा गण्डक्यां प्रातःकाले प्रणवमन्त्रं जपतोऽस्याग्रे पिपासाकुला सगर्भा काचित् हरिणी समागता । तस्यामुदकं पिबन्त्यां सिंहगर्जनमभूत् । सिंहभयान्नदीं तरन्त्यास्तस्या गर्भो जलप्रवाहे निपपात । सा हरिणी कस्यांश्चित् दर्यां मृता । राजर्षिर्भरतो जलप्रवाहे प्रच्युतं मृतमातृकं मृगशावकं स्वाश्रमं समानीय सवात्सल्यं पुपोष । मृगशिशोः स्नेहाधिक्येन राजर्षेर्भरतस्य यमनियमादिषु शैथिल्यं जातम् । संयोगवशात् एकदा मृगशिशुःपलाय्य गतः । मृगशिशोर्वियोगेन चिन्ताकुलो भरतस्तमेव स्मरन् प्राणान् तत्याज । अन्ते या स्मृतिः सा गतिरित्यनुसारं मृगयोनिं प्राप । तस्मिन् जन्मनि जातिस्मृतिर्न नष्टा । आत्मनो मृगत्वकारणं स्मरन् अनुतप्यमानः स स्वमातरमपि त्यक्त्वा शुष्कपर्णतृणाहारेण प्राणान् धारयन् अन्त्यावस्थां प्रतीक्षमाणस्तस्यामेव गण्डक्यां देहं विससर्ज । अपरस्मिन् जन्मनि अङ्गिरागोत्रोत्पन्नस्य कस्यचिद् ब्राह्मणस्य द्वितीयायां भार्यायां भरतस्य जनिरभूत् । अस्मिन् जन्मन्यपि संसर्गदोषो जन्ममृत्युकारको भवतीति स्मरन् भरतो जड इव विचचार । मातापित्रोः परलोकगमनानन्तरं भ्रातृभिर्गृहपरिजनैश्चोपेक्षितो मानापमानं सुखं दुःखं शीतोष्णवातवर्षादिसहिष्णुर्यथोपलब्धं भुञ्जानो भरतो वृष इवानावृताङ्ग स्वच्छन्दं भुवि विचचार । एकदा पुत्रकामः कश्चिद् वृषलपतिर्भद्रकाल्यै नरबलिं दातुममुमेव पशुत्वं समकल्पयत् । परं दारुणं कर्म दृष्ट्वा जडमूर्तेर्दन्द-ह्यमानेन वपुषा भद्रकाली प्रकटीभूय तेनैव खड्गेन तान् जघान । एवमेवान्यस्मिन् कस्मिँश्चित् दिने कपिलाश्रमं गन्तुमुद्यतस्य सिन्धुसौवीरपतेः शिविकावहने नियुक्तः । मार्गे गतिव्यतिक्रमाद् राज्ञा सरोषं सव्यङ्गयमधिक्षिप्तः । देहाभिमानशून्यस्य शान्तचित्तस्य भरतस्य रहस्यमयं प्रतिवचनं श्रुत्वा विस्मयापन्नो रहूगणः सहसा शिविकाया अवरुह्य क्षमां ययाचे । जडभरतोऽपि तस्मै ब्रह्मतत्त्वमुपदिदेश । इत्येतत् श्रीमद्भागवत-विष्णपुराणादिषु वर्णितं वृत्तान्तं गाण्डकीगौरवकाव्ये संक्षेपेण प्रस्तुतमस्ति -

**ब्रह्मचिन्तनरतो भरतो य आश्रमे समवसत्पुलहस्य ।**

**सङ्गतोऽभ्युपगतां मृगतां स्वां सोऽपनीय कृपया तव सिद्धः ॥** ( पन्थी, २०५४, श्लो. ४३) ।

भगवान् बलरामः कौरवपाण्डवानां युद्धोद्यमं श्रुत्वा तीर्थयात्राच्छलेन द्वारकाया निर्गतः । तीर्थयात्राक्रमे पृथूदकं विन्दुसरः, त्रितकूपं, विशालं, ब्रह्मतीर्थं, चक्रतीर्थं, यमुना, सरस्वती इत्येतेषु तीर्थेषु भ्रमन् नैमिषारण्यं प्राप्तः । तत्राविनीतं पण्डितमानिनं पौराणिकं सूतं कुशाग्रेणाहनत् । तेन कारणेन स बह्महत्यादोषेण दूषितः । ब्रह्मवधजन्यपापस्य प्रायश्चित्यर्थं लोकानुशासनसंरक्षणाय च यज्ञदूषणकारिणं बल्वलं दानवं हत्वा वत्सरं यावत् तीर्थेषु स्नात्वा च सूतहत्यया मोक्ष्यस इति ऋषीणामुपदेशानुसारं बलरामो बल्वलं दानवं जघान । ततो नैकासु नदीषु तीर्थयात्रां कुर्वन् पुलहाश्रममेत्य गण्डकीस्नानेन सूतवधपापान्निर्मुक्तोऽभूदिति श्रीमद्भागवती कथा गण्डकीगौरवकाव्येऽपि सङ्केतिता । यथा-

**निर्गुणोऽपि भगवान्बलराम उग्रकल्मषविनाशनकामः ।**

**तावकेऽम्भसि च गण्डकि सस्नावागमस्थितसुरक्षणहेतोः ॥** (पन्थी, २०५४, श्लो. ४४) ।

**श्रीमद्देवीभागवतमहापुराणम्**

कृष्णप्रिया गोपी राधायाः शापवशान्मानवीं योनिमवाप्य धर्मध्वजस्य पत्न्यां माधव्यां समुत्पन्ना । सुदामनामा गोपोऽपि राधायाः शापकारणेन दनुवंशे शङ्खचूडो जातः । तुलसीदेवी बदरीवनमाश्रित्य दिव्यलक्षवर्षं यावत् परमं तपश्चकार । शङ्खचूडोऽपि जैगीषव्यमुनेरुपदेशेन पावने पुष्करक्षेत्रे तपस्तप्त्वा सिद्धिं प्राप । ततः शङ्खचूडो गान्धर्वेण विधिना तुलसीमुपयेमे । तुलस्या सह साऽनन्दं रममाणशङ्खचूडो मन्वन्तरं यावत् राज्यं चकार । तेन हृताधिकारा देवा भिक्षुका इव विचरन्तो ब्रह्मणा सार्धं वैकुण्ठं गताः । विष्णुः शङ्खचूडस्य वधाय शिवाय त्रिशूलं दत्तवान् । शिवशङ्खचूडयोरब्दशतं तुमुलं युद्धमभूत् परं शङ्खचूडो न व्यापादितः । तुलस्याः सतीत्वनाशं विना शङ्खचूडस्य वधोऽसम्भव इति व्योमवाणीं श्रुत्वा विष्णुना मायिकं शरीरं विधाय तुलस्याः सतीत्वं नाशितम् । (श्रीमद्देवीभागवते ९/२४/२,३) । तुलस्या शप्तो विष्णुः पाषाणरूपत्वं गतः । पत्युर्वियोगेन विलपन्तीं तुलसीं दिव्यदेहं विधाय मया सार्धं रमस्व । तवेदं शरीरं गण्डकीरूपे परिणतिमेष्यतीति वरदानेन बोधयामास ।

**छलेन धर्मभङ्गेन मम स्वामी त्वया हतः ।**

**पषाणहृदयस्त्वं हि दयाहीनो यतः प्रभो ॥**

**तस्मात् पाषाणरूपस्त्वं भवे देव भवाधुना ।**

**ये वदन्ति च साधुं त्वां ते भ्रान्ता हि न संशयः ॥**

**इयं तनुर्नदीरूपा गण्डकीति च विश्रुता ।**

**पूता सुपुण्यदा नृणां पुण्ये भवतु भारते ।** (श्रीमद्देवीभागवतमहापुराणे ९/ २४ /२४-२५ ) ।

इदमुपाख्यानं ब्रह्मवैवर्तपुराणेऽपि प्राप्यते ।

**स्कन्दपुराणम्**

मुक्तिक्षेत्रं श्रीकृष्णगण्डक्याः समुत्पत्तिभूमिः । अत्रैव धात्रा तपस्तप्तम्, मुक्तिहेतोर्यज्ञश्च कृतः । तेन जले वह्निमावाह्य हविर्हुतम् । वह्निविग्रहैर्देवैस्तद् हविर्गृहीतम् । तत्र विष्णुर्जलरूपेण शिवोऽग्निरूपेण ब्रह्मा च होतृत्वेन, लोकपाला भोक्तृत्वेन स्थिताः । तस्मिन् स्थले साम्प्रतमप्यग्निदेवता जलज्वालायां विराजत इति स्कन्दपुराणे वाराहपुराणे च वर्णितं वस्तु गण्डकीगौरवकाव्येऽपि सूत्रात्मकरूपेणोल्लिखितम् :-

**तव निर्गमनेन गण्डकि ! हिमवान् मुक्तिपदं निगद्यते ।**

**अधुनाऽपि विराजते ज्वलञ्ज्वलनस्तत्र रमेशराजिते ॥** (पन्थी, २०५४, श्लो. ३ ) ।

स्कन्दपुराणस्य हिमवत्खण्डे भगवता वेदव्यासेन शालग्रामसमुत्पत्तिर्वर्णितास्ति । पुराणानुसारं भगवत्याः पार्वत्याः शापवशात् सर्वे देवाः पाषाणरूपे परिणताः । भगवान् विष्णुरपि शालग्रामस्वरूपेण गण्डक्यां प्रादुर्भूतः । (स्कन्दनागरे २४५/२२, २५१/१५, २५१/२६) । हिमवत्खण्डे श्रीकृष्णभामाहात्म्ये जालन्धरनाम्नो दैत्यस्य पत्न्या वृन्दाया शापवशाद् भगवान् विष्णुर्गण्डक्यां शालग्रामशिलारूपेण स्थितः । विष्णोराज्ञया विश्वकर्मा

कृष्णाभायां वज्रकीटो भूत्वा विष्णोरवतारबोधकानि सुवर्णमयानि चक्राङ्कितचिह्नानि विनिर्मितवान् इत्युपाख्यानं प्राप्यते । ब्रह्मवैवर्तपुराणे (२१/२४), शिवमहापुराणे (५/४१/४३,४४), च राज्ञः धर्मध्वजस्य कन्यायाः शङ्खचूडदैतयस्य पत्न्यास्तुलस्याः शापेन विष्णुः पाषाणमयः शालग्रामो जातः, तुलसी गण्डकीरूपेण परिणता इत्युल्लेखोऽस्ति ।

**पाषाणसदृशस्त्वं च दयाहीनो यतः खलः ।**

**तस्मात् पाषणरूपस्त्वं मच्छापेन भवाधुना ॥**

**इदं शरीरं त्यक्त्वा च दिव्यदेहं विधाय च ।**

**रमस्व हरिणा नित्यं रमया सदृशी भव ॥** (शिवमहापुराणे ४/४१/४३ ) ।

इत्थं नानाप्रकारेण विविधपुराणेषु प्रकटितानामुपाख्यानानां सारः प्रस्तुतकाव्येऽपि सङ्केतितम् :-

**अमृतादपि तावकं जलं मधुरं मातरतोऽनुमीयते ।**

**विलसन्त्यमृतान्धसः सदा किमिति ग्रावमयास्तवोदरे ॥**

**तव गर्भगतोऽस्ति यो हरिर्भुवनानां घटकः स्वलीलया ।**

**अत एव बुधा न हि क्षमा जननि त्वन्महिमानमीरितुम् ॥** (पन्थी, २०५४, श्लो. ८,९) ।

गण्डक्यां विष्णुना सार्धं सर्वेषां देवानां सान्निध्यकारणात् समग्रं गण्डकीक्षेत्रं तीर्थमयमस्ति । अतो गण्डकीतीरे मृतानां प्राणिनां सद्गतिर्भवतीति पौराणिकी मान्यता :-

**शालग्रामसमीपे तु क्रोशमात्रं समन्ततः ।**

**कीटोऽपि म्रियते याति वैकुण्ठभुवनं ध्रुवम् ॥**

**पशुपक्षिमृगा मर्त्या वृक्षा ग्रावास्तृणानि च ।**

**तज्जलस्पर्शनादेव गच्छन्ति स्वर्गमुत्तमम् ॥** (मुक्तिक्षेत्रमाहात्म्ये, पृ. २०,२३) ।

काव्ये समायातं द्वितीयपद्यस्य **हरिगण्डसमुद्भवे** इति सम्बोधनपदमपि गण्डक्याः समुत्पत्ति-सन्दर्भं स्मारयति । देवगणसेविते पवित्रे हिमालयगिरावादिमे कल्पे लोककल्याणकामनया तपस्यतो भगवतः श्रीविष्णोस्तेजः समुत्पन्नम् । तत्तेजसः समुत्पन्नायाः स्वेदधारायाः कल्मषहारिणी नदी जाता । सैव नदी गण्डकी नाम्ना प्रसिद्धा :-

**षट्त्रिंशकसहस्राणां कल्पानामादिमे धरे**

**पुरा विष्णुस्तपस्तेपे लोकानां हितकाम्यया ॥**

**हिमालयगिरौ रम्ये देवतागणसेविते ।**

**ततो बहुतिथौ काले गते सति तपस्यतः ॥**

**तीव्रं तेजः प्रादुरासीद् येन तप्ताश्चराचराः ।**

**तस्योष्मणासमुद्भूतः स्वेदः पूरस्य गण्डयोः ॥**

**तेन जाता धुनी दिव्या लोकानामघहारिणी ।** (सूरिः, २०५५, २/२५-२८ ) ।

वाराहपुराणेऽपि ( १४४/७८-८५) एष सन्दर्भः प्रस्तुतो विद्यते ।

गण्डकीगौरवकाव्यस्याष्टमे पद्ये प्रयुक्तं **विलसन्त्यमृतान्धसः सदा किमिति ग्रावमयास्तवोदरे** इत्येतदुत्तरार्धचरणं देवताः गण्डक्यां शालग्रामरूपेण प्रादूर्भवन् इति वाराहपुराणे सूचितमुपाख्यानं स्मारयति :-

**अहं ब्रह्मा च देवाश्च ऋषिभिः सह केशवः ।**

**सर्वे वेदाश्च यज्ञाश्च सर्वतीर्थानि चाच्युत ॥**

**वसिष्यामः सहैवात्र गण्डक्यां जगतां पते ॥** (वाराहपुराणे, १४५/२०४) ।

लोकस्रष्टुब्रह्मणो दुहिता गण्डकी वर्षाणामयुतम् उग्रं तपस्तप्तेपे । तत्तपसा प्रसन्नो हरिर्गण्डक्यां पुत्ररूपेण प्रादुर्भूतः । अद्यापि भगवान् विष्णुः शालग्रामस्वरूपेण गण्डक्यां विराजत इति पौराणिकं कथनम् :-

**शालग्रामशिलारूपो तव गर्भगतः सदा ।**

**स्थास्यामि तव पुत्रत्वे भक्तानुग्रहकारणात् ॥** (वाराहपुराणे, १४४/६२) ।

परब्रह्मणः सगुणस्वरूपोपासका भक्ताः स्वसाधनानुरूपां सालोक्यम्,सार्ष्टिः,सामीप्यम्,सारूप्यम्, एकत्वमिति पञ्चप्रकारिकां मुक्तिं लभन्ते । भगवतो वैकुण्ठलोके नित्यनिवासः सालोक्यमुक्तिः,नैरन्तर्येण भगवत ऐश्वर्यप्राप्तिः सार्ष्टिमुक्तिः, भगवत्सत्सान्निध्यलाभः सामीप्यमुक्तिः, भगवत्तुल्यरूपग्रहणं सारूप्यमुक्तिः, भगवति विलयनं सायुज्यमुक्ति इत्येवं प्रकारेण पुराणेषु मुक्तिप्रकारा वर्णिताः सन्ति :-

**सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ।**

**दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥** (श्रीमद्भागवतमहापुराणे ३/२९/१३) ।

**आब्रह्मस्तम्बपर्यन्तं तुच्छं मेने च वैष्णवः।**

**सालोक्यसार्ष्टिसायुज्यसामीप्यं च हरेरपि ॥**

**दीयमानं न गृह्णन्ति वैष्णवाः सेवनं विना ।**

**ब्रह्मत्वममरत्वं वा तुच्छं मेने च वैष्णवः ॥** (श्रीमद्देवीभागवतमहापुराणे २/२१/३८-३९) ।

श्रीमद्देवीभागवतश्रीमद्भागवतमहापुराणादिषु वर्णिताया मुक्तेः प्रभावः श्रद्धया नित्यं शालग्रामशिलाः समर्चयन्तो जनाः अन्ते भगवतः सारूप्यमुक्तिं लभन्त इति भावप्रकाशके गण्डकीगौरवस्याधस्तनपद्येऽपि प्राप्यते । यथा :-

**तव गर्भसमुद्भवाः शिला भजता चक्रिसरूपताऽऽप्यते ।**

**जनयित्रि न मेऽत्र संशयस्तव योगादितरा सरिद्यथा ॥** (पन्थी, २०५४, श्लो. २०) ।

## कल्किपुराणम्

पूर्वजन्मनि मल्लारनगराधीशः शशिध्वजस्तत्पत्नी सुशान्ता च गृद्धावास्ताम् । तौ विपिने नीडं निर्माय तत्रैव प्रतिवसतस्म । एकदा कश्चन लुब्धकः पिशिताशिनौ तौ दृष्ट्वा जालेन निगृह्य गण्डक्याः शिलायां व्यपोथयत् । चक्राङ्कितशिलायाः (शालग्रामशिला) स्पर्शमात्रेण मृतावपि तौ गृध्रयोनिं विहाय चतुर्भुजौ भूत्वा ज्योतिर्मयविमानेन वैकुण्ठं गतवन्तौ । तत्र युगशतं स्थित्वा ब्रह्मलोकं ययतुः । ब्रह्मलोकेऽपि युगानां पञ्चशतं यावत् अनेकान् भोगान् उपभुज्य देवलोके (स्वर्लोके) युगचतुःशतं स्थित्वा भुवि मनुष्यजनिं प्राप्तवन्तौ । अस्मिन् जन्मनि भगवत्कृपया राज्ञो वैभवं लब्धवन्तौ । अन्ते भगवतः कल्केरुपदेशेन वैकुण्ठलोकं च प्राप्ताविति गण्डक्या निरतिशयो महिमा वर्णितः । (कल्किपुराणे ३/११/६ -१७) । कल्किपुराणे प्रतिपादितस्य गण्डकीमहिमद्योतकस्य वृत्तान्तस्य प्रभावो वक्ष्यमाणपद्ये विलोकयितुं शक्यते । यथा :-

**व्याधतोऽपि निधनात्तव तीरे गृध्रयोनिमपनीय सदारः ।**

**श्रीशशिध्वजमहीपतिरासीद्वैष्णवं पदमवाप्य कृतार्थः ॥** (पन्थी, २०५४, श्लो. ४२) ।

## वाराहपुराणम्

श्रीकृष्णगण्डक्याः पावनं तटमाश्रित्य अयुतं वर्षपर्यन्तं तपस्यतो मुनेर्देवदत्तस्य तीव्रेण तपसा सशङ्कितो देवराजस्तपोविघ्नार्थं तत्सन्निधौ कामदेवं प्रेषयत् । वसन्तमलयानिलादिकान् पुरस्कृत्य प्रम्लोचा नाम्नी स्वर्वेश्यापि तत्र गता । सा मुनेराश्रममुपेत्य सुमधुरं गीतं जगौ । उद्दीपनात्मकेन वासन्तिकेन वातावरणेन प्रम्लोचायाः कटाक्षपातैः सुललितैर्विभ्रमैश्च मुनिः सम्मोहितः, तां समालिङ्ग्य भृशं रेमे । अन्ते भ्रष्टोऽहमिति प्राप्तनिर्वेदो मुनिः आत्मानं गर्हयन् सगर्भां प्रम्लोचां तत्रैव विहाय भृग्वाश्रमं प्राप्तः । तत्र गण्डकीसङ्गमे स्नात्वा पितृन् सन्तर्प्य देवादीन् सम्पूज्य लोकशङ्करं शङ्करं समाराधयामास । तत्तपसा प्रसन्नो भगवान् शङ्करो हरि-

हरयोरभिन्नत्वमुपदिशन् तस्मै वरं ददौ । देवदत्तो मुनिः शङ्करोपदिष्टमार्गेण उत्तमं ज्ञानमवाप्य मुक्तो जातः । प्रम्लोचापि कन्यकामेकां प्रसूय दिवं गता । वने त्यक्ता रुरुभिर्मृगैः पोषिता बर्धिता सा रुरुकन्या नाम्ना प्रसिद्धा जाता । सापि अनन्यमनसा हृषीकेशं ध्यायन्ती वर्षाणां शतं यापितवती । तस्यास्तपसा सन्तुष्टस्य भगवतो हृषीकेशस्य वरप्रसादेन तत् क्षेत्रं रुरुक्षेत्रनाम्ना प्रसिद्धम् । भगवान् हृषीकेशोऽपि ज्योतिर्मयस्वरूपेण तत्रैव विराजत इति (वाराहपुराणे १४६/५-७७ ), (गण्डकीमाहात्म्ये ३/ ४ -९२) च प्रथितं वस्तु गण्डकी-गौरवकाव्यस्य श्लोकद्वये वर्णितम् । यथा :-

**इन्द्रविघ्निततपाः कृपया ते देवदत्तमुनिरम्ब कृतार्थः ।**
**त्वन्महिम्न इह वर्णनहेतोरागमेषु स उदाह्रियते किम् ॥**
**गण्डकि ! व्रतपरा रुरुकन्या त्वज्जलामृतपवित्रितगात्रा ।**
**ख्यापयन्त्यकलुषा निजनाम दुर्लभं पदमवाप मुरारेः ॥** (पन्थी, २०५४, श्लो. ४८,४९) ।

**वेदान्तदर्शनम्**

पौरस्त्यदर्शने निरतिशयप्रसिद्धं ब्रह्मतत्त्वम् । उपनिषत्सु, श्रुतिशास्त्रेषु, पुराणेषु, गीतारामायणादिषु च ब्रह्मशब्दस्य उल्लेखो वर्तते । ब्रह्म नाम जगतो मूलकारणभूतं सच्चिदानन्दमयं नित्यं निर्विकारं चेतनतत्त्वम् । आत्मनः, परमात्मनः, ईश्वरस्य, वेदस्य, अन्नस्य च बोधकत्वेनापि शास्त्रेषु ब्रह्मशब्दः प्रयुक्तो दृश्यते । वेदान्त-दर्शने यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह । **यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयान्त्यभिसंविशन्ति तद् विजिज्ञासस्व तद् ब्रह्मेति** (तैत्तिरीयोपनिषदि, १/३/१) इत्येवं प्रकारेण ब्रह्मणः परिभाषा प्रदत्तास्ति । परिभाषयाऽनया विदितं भवति यद् ब्रह्म विश्वस्यास्य कर्ता, भोक्ता, साक्षीस्वरूपः परमात्मा अस्ति । यो देशकालाद्युपाधिगतनानाविधरूपेण सर्वत्र व्याप्य तिष्ठति । यस्य साक्षात्कारे कृते अज्ञानं विनश्यति निर्मलं ज्ञानं प्रादुर्भवति । एनमेवोद्दिश्य उक्तं **सर्वं खल्विदं ब्रह्म** । तस्यैव कृपया इदं दृश्यमानं जगद् विभाति । **ब्रह्माण्डस्योपादाननिमित्तकारणभूतं तदेव ब्रह्म नित्यशुद्धबुद्धमुक्तरूपमस्ति** । एवंप्रकारकं बह्म सत्यम् अन्यत् सर्वमसत्यं विनश्वरञ्चास्तीति ब्रह्म सत्यं जगन्मिथ्या इत्यादीनि वचनानि लभ्यन्ते । वेदान्तशास्त्र-वर्णितेनैतेन रहस्येन प्रभावितः कविरुमानाथो गण्डकीगौरवकाव्यस्य षट्पञ्चाशत्तमे पद्ये सङ्केतयति :-

वैदिकवाङ्मये, उपनिषदि,पौराणिकसाहित्ये च ईश्वरः, अजरः, अमरः, व्यापकः, जगन्नियन्ता, सर्वज्ञः, सर्वव्यापकः, सच्चिदानन्दः, तापत्रयविनाशक इत्यादिभिर्विशेषणैः स्तुतः,वर्णितश्चास्ति एवंविधैर्वर्णनैः प्रभावितः कविरुमानाथो गण्डकीगौरवस्य विविधेषु पद्येषु परमेश्वरस्य महिमद्योतकानि अवाङ्मनसगोचरः, परात्परः, सकलभासकः, गुणातीतः, (श्लो. ६४) अच्युतः, चिन्मयः, सच्चिदानन्दः (श्लो. ५८) प्रभृतीनि पूर्वोपात्तानि विशेषणानि प्रयुञ्जानो दृश्यते । अनेनापि कवौ वेदान्तशास्त्रस्य निरतिशयः प्रभावो वर्तत इति सिद्ध्यति ।

सद्विचाररूपिणा वायुनाऽनवरतं प्रदीप्तीकृते निर्विकल्पसमाधिमयेन घृतेन संवर्धिते विशुद्धज्ञानात्मके वह्नौ बुद्धिरूपेण हस्तेन अनेकजन्मार्जितं वासनामयं चरुं कदा होमिष्य इति वर्णने समायातस्य रूपकालङ्कारेणा-लङ्कृतस्य पद्यस्य चत्वारि चरणानि वेदान्तशास्त्रप्रभावितानि विद्यन्ते । २,५१६,१७,२४,६५ पद्येषु समागतानि **भवाकुलितः, भवदुःखम्, भवदग्धचेतः, भवतापनिवृत्तिः, घोरसंसृतिः,** इत्येतानि पदानि वेदान्त-पुराणादिषु बहुधा वर्णितम् आधिदैविकाधिभौतिकाध्यात्मिकतापत्रयमभिव्यञ्जयन्ति । एवमेव ६३,४६,७१ पद्येषु प्रयुक्तानि विषयाऽऽशया, कुभोगविषमूर्च्छितः, विषयमलिनः इत्येतानि पदानि वेदान्तशास्त्रे चर्चिताया विषयसंसृतेर्बोधकानि विद्यन्ते ।

**विनश्वरमिदं जगद् गुणमयं विजानन् कदा ।**
**वसामि दृढमानसस्तव दयोदयाद् गण्डकि !** (पन्थी, २०५४, श्लो. ५६) ।

**श्रीमद्भगवद्गीता**

कामः, क्रोधः, लोभः, मोहः, मदः, मात्सर्यम् एते मानवमनसः षड् रिपवः प्रोक्ताः । विषयोपभोगरूपकामभावनया सत्कर्म नश्यते । धनार्जनस्य लोभेन भक्तिर्नष्टा जायते । क्रोधेन ज्ञानं नश्यति । एवमेव मोहमदमात्स्र्यादीनि च मानवानामधःपतनकारणानि भवन्तीति श्रीमद्भगवद्गीतायां वर्णितम् (श्रीमद्भगवद्गीतायाम् १६/१६,२०,२१) । एवं धर्मशास्त्रेषु, पुराणादिषु च प्रतिपादितमेतद्रहस्यं गण्डकीगौरवकाव्येऽपि कविना इत्थं प्रस्तुतम् :-

**प्रबलाञ्जहि षण्मनोगतान् मम शत्रून्सहसैव गण्डकि !**

**विषयार्दितया धियाऽऽकुलः कथयामीति सगद्‌गदं प्रभो ॥** (पन्थी, २०५४, श्लो. ६६) ।

**आनन्दरामायणम्**

श्रीकृष्णगण्डकी पुराणेषु, रामायणादिग्रन्थेषु च भृशं वर्णिता । आनन्दरामायणस्यानुसारं मर्यादापुरुषोत्तमो भगवान् श्री रामचन्द्रः सीतया सह गण्डक्याः प्रवाहेण पवित्रितं हरिहरक्षेत्रं बभ्राम । गण्डकीतटे कश्याश्चिद् गुहायां चतस्रः विप्रकन्या बन्दीभूताऽसन् । ताः श्रीरामचन्द्रेण मोचिताः । ततो योजनैकदूरे वृक्षसङ्कुले स्थले दुन्दुभिनामकेन रक्षसाऽपहृता षोडशसहस्र वैश्यकन्याः समुद्धृताः । ताभिः पाणिग्रहणार्थं प्रार्थितः श्रीरामचन्द्रस्ताः कृष्णावतारे युष्माकं मनोरथाः सिद्धयन्तीति आश्वासयन् तत्रैवान्तरधीयत इति आनन्दरामायणस्य यात्राकाण्डस्य षष्ठे सर्गे ७१-७२ तमयोः श्लोकयोः राज्यकाण्डस्य एकादशे सर्गे ७२-७३ तमयोः श्लोकयोः, द्वादशे सर्गे ५८ तमे श्लोके वर्णिता कथा गण्डकीगौरवकाव्येऽपि वर्णितास्ति ।

**तव गण्डकि ! नीरसेविका वनिता रामवरात्सहस्रशः।**

**पतिमाप्य कृतार्थतां गता युगपत्कृष्णमहो कुशस्थले ॥** (पन्थी, २०५४, श्लो. २८) ।

अस्य प्रसङ्गस्य सङ्केतः काशीरामसूरिणा गण्डकीमाहात्म्येऽपि (२०५५, १/३५, ४/५) कृतो वर्तते ।

**गण्डकीमाहात्म्यम्**

पाञ्चभौतिकं देहं गण्डकीजले पतितं सत् तादृशानां प्राणिनां जन्म स्वर्गलोके भवति । देहस्य पार्थिवांशो शालग्रामरूपे परिणमते,जलतत्त्वं जले मिलति, तेजस्तेजराशौ विलीयते, प्राणः, अपानः, व्यान, उदान, समानः एते पञ्चप्राणस्वरूपा वायवो वायौ मिलन्ति , आकाशतत्त्वं महाकाशे एकीभवति, जीवात्मा परमात्मनि संलीयत इति देहमुक्तस्य प्राणिनो मुक्तिक्रमः शास्त्रेषु बहुधा चर्चितः । तत्र गण्डकीतीरे प्राणान् त्यजतां प्राणिनां पुनः पुनर्जननमरणात्मिका भवचक्रभ्रमिः समाप्यत इति गण्डकीमाहात्म्यादिग्रन्थेषु प्रतिपादितो गण्डकीमहिमा गण्डकीगौरवकाव्ये प्रस्तुत :-

**कीकसं निपतितं किल शालग्रामरूपमुपयाति जले ते ।**

**मातरत्र विदुषं न च शङ्का नास्तिको वदतु नाम यथेच्छम् ॥** (पन्थी, २०५४, श्लो. ४०) ।

जगत्कर्तुर्ब्रह्मणः पुत्रौ पुलस्त्यपुलहौ सृष्ट्यर्थं गण्डकीक्षेत्रं जग्मतुः । तौ तत्तीरे पृथक् पृथक् आश्रमं निर्माय तीव्रं तपस्तेपाते । गण्डक्या महता प्रभावेण तौ यथाकालं सिद्धौ च जातौ ।

**पुलस्त्यपुलहौ यत्र तेपाते परम तपः ।**

**यत्र सृष्टिविधानार्थं कृत्वाश्रमपदं पृथक् ॥** (वाराहपुराणे, १४४/११३ ) ।

वाराहपुराणे सङ्केतितः प्रसङ्गः कविना स्वकाव्येऽपि स्मृतो वर्तते :-

**एकदा प्रथमे कल्पे कस्याज्ञां शिरसा दधत् ।**

**पुलहो नाम ब्रह्मर्षिः पुलस्त्योऽपि महानृषिः ॥**

**सृष्ट्यर्थं गण्डकीतीरे जग्मतुर्भ्रातरवुभौ ।**

**कृत्वाश्रमपदं तत्र चक्रतुस्तौ महत्तपः ॥** (सूरिः,२०५५, १/२७-२८) ।

गण्डकीमाहात्म्ये तयोस्तपस्थलं गण्डकीक्षेत्रस्य म्याग्दीमण्डलस्थः श्रीकृष्णगण्डकीं निकषा प्रसिद्धः

पुलाग्रामोऽस्तीति लोकोक्तिर्विद्यते । तत्रत्यं प्राक्कालिकमभिलक्षणमप्येतत् सूचयति । यच्च स्थलं राजर्षेर्भर-तस्यापि साधनाक्षेत्रमासीदिति च साम्प्रतमपि लोको विश्वसिति । पुराणेषु प्रथितमेतत् तथ्यं गण्डकीगौरव-काव्येऽपि वर्णितमस्ति -

**हन्त जन्म सफलं मम जातं गण्डकीशुभजलाऽमृतपानात् ।**

**इत्युदीर्य पुलहोऽपि तपस्यन्नात्मरूपमगमत् कृपया ते ॥** (पन्थी, २०५४, श्लो. ४७ ) ।

**ज्यौतिषशास्त्रम्**

ज्यौतिषशास्त्रानुसारं मकरस्थो गुरुर्नीचो भवति । नीचे गुरौ चूडोपनयन-विवाहादीनि शुभानि कार्याणि नैव सम्पादनीयानीति सिद्धान्तः -

**मागधे गौडदेशे च सिन्धुदेशे च कोङ्कणे ।**

**व्रतं चूडां विवाहं च वर्जयेन्मकरे गुरौ ॥** (आचार्यः, १९७२, पृ. ६१ ) ।

**नर्मदापूर्वभागे तु शोणस्योत्तरदक्षिणे ।**

**गण्डक्याः पश्चिमे भागे मकरस्थो न दोषभाक् ॥**

(पन्थी २०५४, षट्चत्वारिंशत्पद्यस्य टिप्पण्याम्) ।

परं नर्मदायाः पूर्वभागे, गण्डक्याः पश्चिमे भागे, शोणनद्या उत्तरे दक्षिणे च नीचांशोऽपि गुरुर्गण्डक्याः प्रभावातिशयमहिम्ना न दोषभाग् इति ज्यौतिषशास्त्रस्य तथ्यं गण्डकीगौरवकाव्ये कविना निदर्शितम् -

**नीचतामुपगतोऽपि कदाचित्पश्चिमे तव समुन्नत इज्यः ।**

**तावकेन जननीह महिम्ना पालितं गुरु गुरुत्वमभीष्टम् ॥** (पन्थी, २०५४, श्लो. ४६ ) ।

**स्तोत्रसाहित्यम्**

गण्डकीगौरवकाव्यस्य कतिचन पद्यानि शङ्कराचार्यप्रभृतिभिर्विरचितैः स्तोत्रैः प्रभावितानि दृश्यन्ते । तत्र नकेवलं भावगतः प्रभावोऽपि तु तत्र शब्दगतमर्थगतञ्च सादृश्यं प्रतीयते । गण्डकीं सम्बोध्य कथिते गण्डकीतुल्या सदया अन्या देवता नास्ति । मनुजेषु मत्समो दीनो जनो नास्तीति बोधके **त्वदृते सदया न देवता मदृते दीनजनो न भूतले** । (पन्थी २०५४, श्लो. ७) । इति सप्तमे पद्ये शङ्कराचार्यकृतस्य देव्य-पराधक्षमास्तोत्रस्य मत्समः पातकी नास्ति पापाघ्नी त्वत्समा न हि इति पद्यस्य स्पष्टः प्रभावोऽनुभूयते । एवमेव

**कृतमन्तुरपि त्वयाऽम्ब नो समुपेक्ष्योऽहमतीव दुःखभाक् ।**

**चपलोऽपि खलोऽपि वाऽर्भको न हि मात्रा समुपेक्ष्यते रुषा ॥** (पन्थी, २०५४, श्लो. १३) ।

इति पद्ये पूर्वोक्तदेव्यपराधक्षमास्तोत्रे स्थितस्य **जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि** इति पद्यस्य स्पष्टः प्रभावोऽनभूयते ।

नरकनाम्ना ख्यातः कोऽपि दैत्यो भगवता विष्णुना व्यापादितः । तेनैव कारणेन भगवान् विष्णुर्नरान्तकसंज्ञया प्रसिद्धोऽभूदिति पुराणादिषु स्तोत्रेषु च प्रसिद्धम् ।

**दिवि वा भुवि वा समास्तु वासो नरके वा नरकान्तक प्रकामम् ।**

**अवधीरितशारदारविन्दौ चरणौ ते मरणेऽपि चिन्तयामि ॥** (मुकुन्दमालास्तोत्रे श्लो. ६ ) ।

काव्यस्याष्टमे पद्ये समायाता स्वलीलया भुवनानां घटको हरिर्गण्डकीगर्भगतोऽस्तीति पदावलि-र्विशेषाभिप्रायेण प्रयुक्ता विद्यते । इयं पदावलिर्भगवति विष्णौ विश्वब्रह्माण्डं लीयते, दृश्यमानं जगत् श्रीविष्णोर्विराट् स्वरूपमस्ति स एव ईश्वर अन्तर्यामिस्वरूपेण प्राणिनां हृदयकुहरेऽपि निवसतीति पुराणेषु उपनिषत्सु, विविधेषु स्तोत्रसाहित्येषु च वर्णितं तथ्यं स्मारयति । तदनुसरं इयं पृथिवी परमेश्वरस्य पादकल्पास्ति, वियद् नाभिरस्ति, वायवोऽसवः विद्यन्ते, नेत्रे चन्द्रसूर्यौ स्तः आशाः कर्णौ विद्येते, द्यौः शिरोऽस्ति, अग्निर्मुखमस्ति, समुद्रो

वसतिर्विद्यते, देव-नर-खग-सर्प-गन्धर्व-दैत्यादिभिश्चित्रं विश्वं विष्णोर्हृदये लीनं भवति :-

**भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे**
**कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।**
**अन्तस्थं यस्य विश्वं सुरनगखगगोभोगिगन्धर्वदैत्यै-**
**श्चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि ॥** (विष्णुसहस्रनामस्तोत्रे, ध्यानपद्ये २) ।

इदमेव रहस्यं (मण्डूकोपनिषदि ४) च वर्णितं विद्यते । गण्डकीगौरवकाव्यस्य पञ्चत्रिंशत्तमे पद्ये श्रीगण्डक्या जलस्य विशेषणतया समायातं **नरान्तकधारि** पदं भगवतः श्रीविष्णोर्लोकोपकारकं चरित्रं स्मारयति । अत्रापि पौराणिककथायाः प्रभावोऽस्ति ।

कृष्णगण्डकी वैदिकधर्मावलम्बिनां जनानां कृते शक्तिमयी देवमाता वर्तते । अस्यास्तटे त्यक्तदेहाः प्राणिनः परमं मोक्षपदमाप्नुवन्तीति विश्वसन् कविर्गण्डकीतीरे पर्णकुटीरं निर्माय दुःखमयं सांसारिकं प्रपञ्चं विहाय समाधिस्थः सन् परमात्मानं ध्यायं ध्यायं प्राणान् त्यक्तुमीहते । कविर्मोक्षैककामनया भगवतीं गण्डकीं स्तौति । यथा :-

**लघुं तृणपुटीं कुटीं विरचयंस्त्वदीये तटे**
**हरेश्चरणपङ्कजं मनसि धारयन् सुन्दरम् ।**
**विनश्वरमिदं जगद् गुणमयं विजानन् कदा**
**वसामि दृढमानसस्तव दयोदयाद् गण्डकि !** (पन्थी, २०५४, श्लो. ५६) ।

अस्मिन् पद्ये कस्यचित् कवेः **कदा वाराणस्यां विमलपुलिने** इत्यादिपद्यस्य प्रभावो विलोक्यते ।

## निष्कर्षः

सुमहत्यां संस्कृतकाव्यप्रणयनपरम्परायां विविधेषु विषयेषु रचितानां खण्डकाव्यानां भूयसी सङ्ख्या वर्तते । श्रीकृष्णगण्डकीमधिकृत्य राष्ट्रभाषायां विरचितानि काव्य-खण्डकाव्य-महाकाव्यादीनि च लभ्यन्ते । गण्डकीमाश्रित्य संस्कृतभाषायां विविधानि स्तोत्राणि स्फुटकविताश्च विरचिताः परं तस्याः पौराणिक-सांस्कृतिक-प्राकृतिकपक्षानां महत्तां प्रकटयतां काव्यानामभाव आसीत् । अस्याभावस्य पूर्तिं विधातुं पौराणिकवाङ्मये, लोके, समाजे च प्रसिद्धां देवादिभिर्वन्दितां ऋषिभिःसेवितां भगवतीं श्रीकृष्णगण्डकीं नायिकां प्रकल्प्य उमानाथ-कविना गण्डकीगौरवकाव्यं प्रणीतमिति काव्यस्यास्यैतिहासिकी महत्ता प्रकटीभवति । काव्यशास्त्रदृष्ट्या विहितेऽनुशीलने इयं कृतिः खण्डकाव्यसंरचनायां समाहितं भवति । यद्यप्यत्र केवलं एकसप्ततिः श्लोकाः सन्ति, तथापि विषयवस्तुप्रतिपादन-रसभावविधान-छन्दोऽलङ्कारसंयोजनदृष्ट्या काव्यमिदं खण्डकाव्यायते । स्तुतिकाव्यपरम्परायामप्यस्य स्थानं निर्धारयितुं शक्यते । अध्ययनेऽस्मिन् शास्त्रान्तरप्रभावो विवेचितः । शास्त्रकाव्याद्यवेक्षणजन्या व्युत्पत्तिरपि काव्यनिर्माणे कारणं भवतीति वदतां विपश्चितां मान्यतामनुसृत्य काव्यमिदं विनिर्मितमस्ति । अत्र कवेरुमानाथस्य व्युत्पत्तिर्विशिष्टा प्रतिभा च दरीदृश्यते । कविः स्वयं तात्कालिकसमाजे प्रख्यातः पौराणिक आसीत् । तदनुसारमत्र महापुराणानाम्, उपनिषदाम्, गीतायाः, रामायणस्य च प्रत्यक्षः प्रभावो विलोक्यते । तस्यैवानुशीलनमत्र विहितमस्ति ।

## सन्दर्भसूची

आचार्य, श्रीरामः (सन्. १९७२), *मुहूर्तचिन्तामणिः*, व्या. केदारदत्त जोशी, वाराणसी : मोतीलाल बनारसी दास ।

आनन्दरामायणम्, https://vedpuran.files.wordpress.com/2013/04/anandramayan.pdf.11-12-2021

(सन्. २०१६) *ईशाद्यष्टोत्तरशतोपनिषदः*, श्री वासुदेवशर्मणा संस्कृतः, (पुनर्मुद्रितसं.) वाराणसी : चौखम्बा विद्याभवनम् ।

गौतमः, कुलचन्द्रः (२००७), "शुभाशंसा" *गण्डकीगौरवम्*, दाङ : महेन्द्र-संस्कृत-विश्वविद्यालयः ।

ढकालः वेणीमाधवः (२०५४), "नेपालदेशीयम् आधुनिकसंस्कृतसाहित्यम्", *ऋतम्भरा* वर्ष ४ अङ्क ७ दाङ : महेन्द्र संस्कृत विश्वविद्यालय । पृ. ५६ ।

ढकालः वेणीमाधवः अन्ये च (२०५४), "गण्डकी गौरवको साहित्यिक विशेषता", *गण्डकीगौरवम्,* दाङ : महेन्द्र- संस्कृत- विश्वविद्यालयः ।

भट्टराई, घटराजः (२०५५), *संस्कृतका अमर साहित्यकार,* (संशोधित परिवर्धित सं.) ललितपुर : साझा प्रकाशन ।

पन्थी, टीकारामः (२०६३), *काव्यचतुष्टयविमर्शः,* दधिरामस्मृतिप्रतिष्ठानम् अन्यानि च ।

पन्थी, उमानाथः (२०५४), *श्रीगण्डकीगौरवम्,* दाङ : महेन्द्र-संस्कृत-विश्वविद्यालयः ।

मुक्तिक्षेत्रमाहात्म्यम् (२०६८), संकलकः श्रीनिवास मुक्तिनारायण रामानुजजीयर स्वामी, काठमाडौं : अखण्डज्योतिबाबा स्वामी श्रीजी च्यारिटेबल ट्रष्ट ।

वेदव्यासः, (सन् १९९१) *कल्किपुराणम्,* (पुनर्मुद्रण सं), वाराणसी : श्री जीवानन्दविद्यासागर भट्टाचार्यः

________ (सन् २०१६) *श्रीमद्भागवतमहापुराणम्,* (परिवर्धित सं), वाराणसी : रूपेश ठाकुरप्रसाद प्रकाशन ।

________ (सन् १९८२) *वाराहपुराणम्, (द्वि.सं),* सम्पा. हृषीकेश शास्त्री, वाराणसी : चौखम्बा अमर भारती ।

________ ब्रह्मवैवर्तपुराण (२०७३), गोरखपुर : गीताप्रेस ।

________ (२०६६) *श्रीमद्देवीभागवतमहापुराणम् (अष्टादश सं.),* गोरखपुरम् : गीताप्रेसः ।

________ (२०५५) *शिवमहापुराणम्,* शिवभाषाटीकोपेतम्, दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान ।

________ स्कन्दपुराणम् (१९३३), बम्बई : खेमराज श्रीकृष्णदास, बैंकटेश्वर स्टीम मुद्रणालय ।

श्रीमच्छङ्कराचार्यः,(२०७४) "श्रीदेव्यपराधक्षमास्तोत्रम्" *शुक्लयजुर्वेदीयरुद्राष्टाध्यायी* तनहुँ : महेशसंस्कृतगुरुकुलम् ।

"श्री मुकुन्दमालास्तोत्रम्" (सन् १९९९) *श्री रंगवेंकटेशबृहत्स्तोत्रमाला,* सम्पा. श्रीनिवास खगेन्द्राचार्यः, मुम्बई : श्रीकिशन सोमानी मैमोरियल ट्रस्ट ।

श्री विष्णुसहस्रनामस्तोत्रम् (२०७१) सर्वसिद्धिस्तोत्रम्, बाग्लुङ : श्रीधराचार्य यतिराज प्रकाशन ।

सूरिः, काशीरामः (२०५५), गण्डकीमाहात्म्यम्, दाङ : महेन्द्र-संस्कृत-विश्वविद्यालयः ।